वैयाकरणमते समासानां योगरूढ़त्वमेव यथोक्तं” वै० भू० ।
“समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् । बहूनां वृत्ति-
धर्म्माणां वचनैरेव साधने । स्यान्महद्गौरवं तस्मादेकार्थी
भाव आश्रितः । चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्ज-
नम् । कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ।
अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना । क्लृप्तत्यागश्चास्ति
तत्र तत् किं शक्तिं न कल्पते ।” समास इति वृत्ति-
मात्रोपलक्षणम् । “समर्थः पदविधिः” इत्यत्र पदमुद्दिश्य
यो विधीयते समासादिः स समर्थः विग्रहवाक्याभिधान-
शक्तः सन् साधुरिति सूत्रार्थस्य भाष्याल्लाभात् । पदो-
द्देश्यकविधित्वञ्च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु
पञ्चस्वपि वृत्तिष्वस्त्येव । विशिष्टशक्त्यस्वीकर्तॄणां मते दूषणं
शक्तिसाधकमेवेत्याशयेनाह पङ्कजशब्दवदिति । पङ्कज-
निकर्त्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न
सिध्येत् । न च पद्मत्वरूपेणोपस्थितये सा कल्प्यत इति
वाच्यम् । चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये तत्-
कल्पनावश्यकत्वात् । लक्षणयैव तथोपस्थितिरिति चेत्
पङ्कजपदेऽपि सा सुवचा । एवं रथकारपदेऽपि तथा च
“वर्षासु रथकारोऽग्निमादधीत” इत्यत्रापि विना लक्षणां
क्लृप्तयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ तत्कल्पनां कृत्वा
जातिविशेषस्याधिकारित्वं प्रकल्प्याऽपूर्व्वकल्पनमयुक्तं स्या-
दिति भावः । साधकान्तरमाह बहूनामिति वृत्तेर्धर्म्मा
विशेषणलिङ्गसंख्याद्ययोगादयस्तेषां वचनैरेव साधने
गौरवमित्यर्थः । अयं भावः विशिष्टशक्त्यस्वीकारे राज्ञः
पुरुष इत्यत्रेव राजपुरुष इत्यत्रापि स्याद्विशेषणाद्यन्वयः
राजपदेन स्वतन्त्रोपस्थितिसत्त्वात् । विभाषावचनञ्च
समासनियमवारणाय कार्य्यमिति । ननु “सविशेषणा-
नामिति” वचनान्न विशेषणाद्यन्वयः विभाषावचनञ्च
कृतमेवेत्याशङ्क्य समाधत्ते वचनैरेवेति । न्यायसिद्धमेव
सूत्रम् । व्यपेक्षाविवक्षायां वाक्यस्य एकार्थीभावे समास-
स्येति स्वभावत एव प्रयोगनियमसम्भवात् । सविशेषणेत्यपि
विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयान्वयासम्भवात् न्याय-
सिद्धमिति भावः । अतएव व्यपेक्षापक्षमुद्भाव्य अथैतस्मिन्
व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स
वक्तव्य इति भाष्यकारेण दूषणमभ्युक्तम् । तथा धवख-
दिरौ, निष्कौशाम्बिर्गोरथो घृतघटो गुड़धानाः केश-
चूड़ः सुवर्णालङ्कारो द्विदशाः सप्तपर्ण इत्यादावितरेतरयो-
गादिक्रान्तयुक्तपूर्णमिश्रसङ्घातविकारसुच्प्रत्ययलोपो, वी-
प्साद्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति ।
दूषणान्तरमाह । चकारादीति आदिना घनश्यामः हंस-
गमन इत्यादावविवादीनां पूर्व्वोक्तानाञ्च संग्रहः । दूषणा-
न्तरमाह । बहुव्युत्पत्तिभञ्जनमिति । अयमाशयः चित्र-
गुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा । न च तत्र
लक्षणा प्राप्तोदको ग्राम इत्यादौ तदसम्भवात् । प्राप्ति-
कर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणाया-
मप्युदककर्तृकप्राप्तिकर्म्मग्राम इत्यर्थालाभात् । प्राप्तेति
क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्म्मणि लक्षणेति चेत्तर्हि समा-
नाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्न-
प्राप्तिकर्म्मेति स्यात् । अन्यथा समानाधिकरणप्रातिपदि-
कार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः प्राप्तेर्धात्वर्थतया कर्तृता-
सम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च । अन्यथा
देवदत्तः पच्यत इत्यत्र कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भ-
वेनानन्वयानापत्तेः । अथोदकाभिन्नकर्तृका प्राप्तिरिति
बोधोत्तरं तत्सम्बन्धी ग्रामो लक्ष्यत इति चेन्न प्राप्तेर्धात्वर्थ-
तया क्तार्थकर्तारं प्रति विशेष्यताया असम्भावात् ।
प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः । प्राप्त-
पदे प्राप्तेर्विशेष्यत्वे तस्याएव नामार्थत्वेनोदकेन समम-
भेदान्वयापत्तेश्च । एवमूढ़रथः उपहृतपशुः उद्धृतौदना
बहुपाचिकेत्यादावपि द्रष्टव्यम् । अत्र हि रथकर्म्मक-
वहनकर्त्ता, पशुकर्म्मकोपहरणोद्देश्यः, ओदनकर्म्मको-
द्धरणावधिः बहुपाककर्त्त्र्यधिकरणमिति बोधाभ्युपगमात्
अतिरिक्तशक्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृक-
प्राप्तिकर्म्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वा-
ह इति भावः । साधकान्तरमाह । अषष्ठ्यर्थेति । अयं भावः
चित्रगुरित्यादिषु चित्रगवस्वाम्यादिप्रतीतिर्न विना शक्तिमु-
पपद्यते । नच तत्र लक्षणा सा हि न चित्रपदे चित्रस्वामी
गौरिति बोधापत्तेः । गवादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र
चित्रादेरन्वयायोगात् । नच चित्राभिन्ना गौरिति शक्त्युप-
स्थाप्ययोरन्वयबोधोत्तरं तादृशगवस्वामी गोपदेन लक्ष्यत इति
वाच्यम् । गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण
लक्षकत्वासम्भवात् । नच गोपदे साक्षात् सम्बन्धएव विनि-
गमक इति वाच्यम् । एवमपि प्राप्तोदकः कृतविश्व इत्या-
द्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः । यौगिकानां कर्त्रा-
द्यर्थकतया साक्षात्सम्बन्धाविशेषात् । नच पदद्वये लक्ष-
णेति नैयायिकोक्तं युक्तम् बोधावृत्तिप्रसङ्गात् । न च
परस्परं तात्पर्य्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयो-